अ.म. इन्द्रेशानेमध्ये त्यान्नुसाम्प्रदो द्वादशादित्यांगायत्रीयानुष्टुब्त्रियान् इत्यादि द्वादशा
३० दित्या नावाह्य॥ धातार्यमा च मित्रश्च वरुणोंऽशो भगस्तथा॥ इन्द्रो विवस्वान्
पूषा च पर्जन्यो दशमस्तथा॥ ततस्त्वष्टा ततो विष्णुरजघन्यजः॥ इत्येते
द्वादशादित्यानामभिः परिकीर्तिताः॥ अग्नेः पश्चिमे आरुद्रासः शावा
ध्यश्चैकादशरुद्रा जगती ॐ आरुद्रासः इति रुद्रानावाह्य वीरभद्रश्च
शम्भुश्च गिरिशश्च महायशाः॥ अजैकपादहिर्बुध्न्यः पिनाकी चापराजि
तः॥ भुवनाधीश्वरश्चैव कपाली च विशांपतिः॥ स्थाणुर्भगश्च भग
वान् रुद्रा एकादश स्मृताः॥ यम्यां निर्ऋति मध्ये ब्रह्मजज्ञानं गौत
मो वामदेवो ब्रह्मा त्रिष्टुप्॥ ॐ ब्रह्मजज्ञानं॥ इत्यादि ब्रह्माणं आ
वाह्य यम्यां निर्ऋति मध्ये गौरी मिमाय दीर्घतमा जगती गौरीर्मिमाय॰

© Dharmartha Trust J&K. Digitized by eGangotri

मातरइहागच्छइहतिष्ठ॥ मातृमावाहयामि॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी त
था॥ वाराही चेन्द्राणी चामुण्डाः सप्त मातरः॥ निर्ऋते रुत्तरतः॥ गणानांत्वा
[illegible]हामंदोगणाः॥ विघ्नप निर्ऋतीं गनी ॐ गणानांत्वा ग० इत्यादि गणेशं॥ वरुणा
दुत्तरे मरुतो यस्य राकुंभ राणामं मरुतो [illegible] गनी॥ ॐ मरुतो यस्य हि० इत्यादि मरु
तः गगनस्पर्शनो वायुरनिलो मारुतस्तथा॥ प्राणः प्राणेश जीवौ च मरुतोऽष्टौ प्र
कीर्तिताः॥ [illegible] जातवेदसे [illegible] पूः॥ ॐ जातवेदसे० इ
[illegible]दुर्गां॥ एवमेता देवता आवाह्य पूजयेत॥ ॐ [illegible] मर्यादाथं
[illegible] इत्यादि प्रयोगेण पाद्यं पाद्याचमनीय मधुपर्कमाचमनी
यं [illegible] यज्ञोपवीतमाचमनीयं च मुकुट कटकादि अपांते [illegible]
य [illegible] यज्ञोपवीतं [illegible] नमोऽन्ते चन्दनादि अपणांते पदा
इन्द्रादीनां प्रत्येकं स्वस्वनाम [illegible] पदीपनैवेद्यादि दद्यात॥ पुष्पाञ्जलिं
दत्वा नृत्य गीत वाद्येन इत्यादि मर्गं [illegible]

© Dharmartha Trust J&K. Digitized by eGangotri

ध०म० लिंदला इन्द्रादीनां गन्धादीनि पूर्ववद् दत्वा ॥ गन्धपुष्पादीनि च घटे धर्मपूजायां च रक्तानि का-
र्पासानि इन्द्रादीनां यथालाभं । एतदेतं प्राड्विवाकः कुर्यात् ॥ ततः स्तुतिर्भि-र्भविगिमश्च तस्य
३१ दिक्षु लौकिकाग्निस्थापनादि पूर्वं होमः कार्यः तत्र सप्रणवां गायत्रीमुच्चार्य पुनः
स्वाहाकारान्तं प्रत्येकमुच्चार्य आज्यचरुसमिद्भिः प्रत्येकमष्टोत्तरशतं सत्रे जुहुयुः ॥
ततोऽभियुक्तमर्थं पत्रे लिखेद् अभियुक्तः ॥ आदित्यचन्द्रावनिलोनलश्च द्यौर्भूमिरा-
पो हृदयं यमश्च ॥ अहश्च रात्रिश्च उभे च संध्ये धर्मश्च जानाति नरस्य वृत्तमिति
मंत्रं च लिखेत् ॥ तत्र तं च संशोध्याभियुक्तशिरोगतं कुर्यात् ॥ इदं च धर्मावाहनादि
31 शिरः पत्रदानांतं सर्वं दिव्यसाधारणं ॥ ततः प्राड्विवाको घटमभिमंत्रयेत् ॥ त्वं घट
ब्रह्मणा सृष्टः परीक्षार्थं दुरात्मनां ॥ धकारो धर्ममूर्तिस्तु टकारः कुटिलं नरं ॥ धृतो
तृ भावयसे यस्माद् घटस्तेनाभिधीयसे ॥ त्वं वेत्सि सर्वभूतानां पापानि सुकृतानि च ॥ त्वमेव
सर्वं जानीषे न विदुर्यानि मानवाः ॥ व्यवहाराभिशस्तोयं मानुषः शुद्धिमिच्छति ॥ तदेनं संशया-
द् अस्माद् धर्मतस्त्रातुमर्हसि ॥ इति मंत्रेण ॥ ततोऽभियुक्तः त्वं तुले सत्यधामासि पुरा देवैर्विनिर्मिता ॥
तत्सत्यं वद कल्याणि संशयान् मां विमोचय ॥ यद्यहं पापकृन्मातस्ततो मां त्वमधो नय ॥
शुद्धश्चेद् गमयोर्ध्वं मां इति तुलामभिमन्त्रयेत् ॥ ततः प्राड्विवाकः ॥ शिरोगतपत्रकं अभियु-
क्तं यथास्थानं यच्छेत् ॥ ३१

© Dharmartha Trust J&K. Digitized by eGangotri

ण्यासं निवेशं च घटमारोप्य पंचपल्लवं तत्रैव तत्र स्थापयेत ॥ तस्मिंश्च काले ष्टु चाष्टु द्वीपरीन्द्रपष्ठ चिमि ब्रा
ह्मणौ रात्रे सम्येष्वस्त्र निवेदनीये ॥ ततस्ततो वतीर्य प्राड्विवाक ब्रह्माविजो यथा विभवं दक्षिणाभिस्तोषयेत ॥
॥ तस्मिंश्च काले ष्टु स्वष्टु द्वीपरीन्द्रष्टु चिमि ब्राह्मणौ ततो देवतानां ऊर्जि ब्रह्मणस्पते ॥ यां तु देवगणाद्भिर्निवि
ष्टत्य सर्वं प्राड्विवाकाय समर्पयेत ॥ अथाग्नि विधिः ॥ पितामहः ॥ अग्ने विधिं प्रवक्ष्यामि यथावच्छास्त्रचो
दितं ॥ कारयेन्मंडलान्यष्टौ पुरस्तान्नव मंत्रया ॥ आग्नेयमंडलं चाद्यं द्वितीयं वारुणं तथा ॥ तृतीयं वायु
दैवत्यं चतुर्थं यमदैवतं ॥ पंचमं त्विंद्रदैवत्यं षष्ठं कौबेरमुच्यते ॥ सप्तमं सोमदैवत्यं सावित्रं त्वष्टम
तथा ॥ नवमं सर्वदैवत्यमिति वेदविदो विदुः ॥ मदनरत्ने ॥ अष्टमं सर्वदैवत्यं ॥ पुरस्तान्नवमं पद्मं तन्म
ध्यात्पार्थिवं विदुः ॥ गोमयेन कृतानि स्युरद्भिः पर्युक्षितानि च ॥ तिपपाठ ॥ मंडलानां परिमाणमाह स

© Dharmartha Trust J&K. Digitized by eGangotri

त्र·म· ३२

32

एव॥ द्वात्रिंशदंगुलं प्राकुमंडलांतरं॥ अत्रापि मंडलैरेव मंगुलानां शतद्वयं॥ षट्पंचाशत्समधिकं भ्रमेस्तु प
रिकल्पना॥ मंडलान् मंडलादेः। मंडलभुवोंतरालभुवश्च मिलिता द्वात्रिंशदंगुलानीत्यर्थः॥ तत्र षोड
शांगुलाधिकं तदंतरालं षोडशमंडलं मंडलयोरंतरालं च तावदेव॥ षोडशांगुलकं चेयं मंडलं तावदं
तरमिति यावत्तव लक्षणैः। यदि शोध्यापदं षोडशांगुलाधिकं तदंतरालं षोडशांगुलन्यूनमेव भवति
। यदि शोध्यपदं षोडशांगुलादल्पं तदा षोडशांगुलमंडलमध्ये पदपरिमाणमेवांतरमंडलंका
र्यं। यत्तु नारद एव शतद्वयमित्यस्यार्थे। चत्वारिंशत्समधिकं भ्रमे रंगुलमानं तदिति पपाठ। तदह
मनवमंडलांतरालभूभागं विहाय योज्यं। तस्यागमनानर्हत्वात्॥ एवं चतुर्विंशतिसंख्यातान्भ्रमे राम
स्तु परिकल्पने निकल्पतरुकोपि पाठेप्यात्मवस्थिति मंडलं विहायांगुलपरिमाणं योज्यं। मंडले ३२

© Dharmartha Trust J&K. Digitized by eGangotri

मंडले देयाः कुशाः शास्त्रप्रचोदिताः। विन्यसेत्तु पदं तेषु कर्णानित्यमिव निस्पितिः। मितान्नरायां मदनरत्ने
च ॥ शांत्यर्थं जुहुयादग्नौ घृतमष्टोत्तरं शतं। अयं च होमो ऽग्नये पावकाय स्वाहेति मंत्रेण कार्य इति वि
ज्ञानेश्वरः ॥ नारदः। जात्यैव लोहकारो यः कुशलश्चाग्निकर्मणि। दृष्टप्रयोगश्चान्यत्र तेनायोग्नौ
प्रतापयेत्। अग्निवर्णमयःपिंडं सस्फुलिंगं सुरञ्जितं। पितामहः। अखिन्नेन समंकृत्वा अष्टां
गुलमयोमयं ॥ पिंडं तु तापयेदग्नौ पंचाशत्पलिकं समं ॥ कालिकापुराणे ॥ शतार्द्धपलिकं वृत्तं द्वा
दशांगुलमायतं ॥ लोहमग्निमयं ध्यात्वा देयं सत्याभिशापिने ॥ शंखलिखितौ। पिंडस्य षोडशप
लं समाहृतः ॥ अथवा स्नात्वा ऽक्षपात्रांतःस्थितं षोडशपलमग्निवर्णं पिंडमंजलिना दायेत्यादि। एतत्
च्चाग्नौ। तृतीयतापे तप्तं तमिति नारदोक्तेः। विचारं पिंडः संतप्तः। तत्र संतप्तजले निक्षिप्य पुनः सं

© Dharmartha Trust J&K. Digitized by eGangotri

प्र·म·
३३
33

नापराजतेन्द्रिद्यस्वापुनस्तात्प्यमानेप्राड्विवाकोधर्मो वाङ्नादिशिरःपत्रारोपणंतंकुर्यात॥तत्र वह्निरजायां
विशेषमाह पितामहः॥तत्रपूजांकृत्वाशास्यकारयेन्मनुजाधिपः॥रक्तचंदनधूपाभ्यांरक्तपुष्पैस्तथैवच॥
सारात्तः॥प्राङ्मुखस्तततस्तिष्ठेत प्रसारितकरांगुलिः॥प्राड्विवाससाःशुचिश्चैवशिरस्यारोप्यपत्रकं॥
शोध्यस्तु विशेषः॥नारदः॥हस्तान्तनेषु सर्वेषु कुर्यात्संसपदानि तु॥तान्येव पुनरालभ्येद्धस्तौ बिंदु
विचित्रितौ॥याज्ञवल्क्यः॥करौविमृदितव्रीहिरंकपितानततोन्यसेत॥सप्ताश्वत्थस्यपत्राणितावत्सूत्रेण
वेष्टयेत॥तावदितिक्रियाविशेषणं॥तेनसप्तवारंवेष्टयेदितिविज्ञानेश्वरः॥तावतांसूत्राणांसमाहार
स्तावत्सूत्रंतेनतावत्सूत्रेणसप्तसंख्यासहकहेदृषपेदितपर्थइतिमदनः॥पितामहः॥सप्तपिप्पलपत्राणिअ राम
स्ततान्स्तु मनोदधि॥हस्तयोर्निक्षिपेत्तत्रसूत्रेणावेष्टनं तथा॥प्रत्रप्राड्विवाकस्य पिंडस्याग्न्यभिमंत्रण ३३

© Dharmartha Trust J&K. Digitized by eGangotri

मंत्राः॥ प्रयोगे वन्द्यं ते। यातवल्क्यः॥ त्वमग्ने सर्वभूतानामंतश्चरसि पावक॥ साक्षिवत्पुण्यपापेभ्यो ब्रू-
हि सत्यं कवे मम॥ तस्येत्युक्तवतो लोहं पंचाशत्पलिकं समं॥ अग्निवर्णं न्यसेत्पिंडं हस्तयोरुभयोरपि॥ पिता-
महः॥ ततस्तं सप्तपादाय राजधर्मपरायणः॥ संदंशेन निष्कृत्ता वा हस्तयोस्तस्य निक्षिपेत॥ नारदः॥ हस्ता-
भ्यां तं समादाय प्राड्विवाकसमीरितः॥ स्थित्वैकस्मिंस्ततो म्यानि व्रजेत्सप्त जिह्मगः॥ पितामहः॥ तर माणि
न गच्छेन्नरुखस्थो गच्छेच्छनैः शनैः॥ न मंडलमतिक्रामेन्नांतरा स्थापयेत्पदं॥ प्रस्थ मंमंडलं गत्वा नवमे नि-
क्षिपेद्बुधः॥ इति॥ पिंडस्थस्तत्त्वे नवमं मंडले निक्षेप्यः॥ मंडलानि तथा सप्त षोडशांगुलमानतः॥ ना-
वदंतरस्तोगच्छेत्तावान वर्त्मान्निक्षिपेत्तरति कालिकापुराणात्। पितामहः॥ ततस्तु हस्तयोः प्राश्य व्रीहीन्वाय-
द्विवापवान॥ निर्विशंके न तेषां तु हस्ताभ्यां मर्दने कृते॥ निर्विकारे दिनस्यांते शुद्धिं तस्य विनिर्दिशेत॥

© Dharmartha Trust J&K. Digitized by eGangotri

व्य·म· क्षात्पायनः॥ अस्यवस्त्वन्तमभियुक्तोऽतस्थानाद् [illegible] च दह्यते॥ न तदग्वं विदुर्देवास्तस्य भयो पिदापयेत्॥ यावन्तवजयः
३४ अन्तरापतिते पिंडे संदेहे वा हुनहरेत्॥ अथ प्रयोगः॥ पूर्वे घुर्नेमुद्धिविधायपरे घुनंव मंडलानि कार्याणि॥ त
त्राद्यं षोडशांगुलं विधायाग्रे द्वात्रिंशदंगुलमभागं द्विधा विभज्य द्वितीयभागे [illegible] पदप्रमाणं द्वितीयं मं
डलं कार्यं। अवशिष्टमन्तरालं भवति। एवमेव तृतीयाद्यन्तिमपर्यन्तमन्तरालसहितं निर्वर्त्याग्रे षोडशांगु
लमन्तरालं मुक्त्वा नवममपरिमितांगुलप्रमाणं कार्यं॥ तथा चाष्टानां मंडलानामन्तरालं च मि
लितांगुलानां षट्पंचाशदधिकं शतद्वयं संपद्यते। तिर्यग्पत्रोदरा एपष्टोडध्वी वीहयवत्रयः॥ प्रमा
णमंगुलस्योक्तं वितस्तिर्द्वादशांगुलः॥ हस्तो वितस्ति द्वितयं दंडो हस्तचतुष्टयं॥ तत्सहस्रद्वयं क्रोशो राम
योजनं तच्चतुष्टयं। वितस्त्याष्टकैरश्वो पयोज्यते॥ ततः पश्चिमादिषु नवसु मंडलेषु षिदेवताः क्रमेण॥ ४०

© Dharmartha Trust J&K. Digitized by eGangotri

ग्निं वरुणं वायुं यममिंद्रं कुबेरं सोमं सवितारं सर्वदेवताश्च संपूज्य मंडलमध्यगाद्दक्षिणप्रदेशे लौकि
कमग्निमुपसमाधायाग्नये पावकाय स्वाहेत्याज्येनाष्टोत्तरशतं जुहुयात् आह्निवाकः शांतरूपी॥ ततस्तस्मिन्नग्ना
वश्विरष्टि तद्वत्तज्ज्वालामध्ये प्रगलायां मे पंचाशत्पलसमितमयः पिंडं प्रक्षिप्य तस्मिंस्तप्यमाने धर्मावा
दृनादिरुद्रवनांतं घट् विधूतकर्मा मण्डुषानकांडकृत्वातातीयेतापेवर्तमाने ऽयः पिंडस्थमग्निमभिमंत्रयेदेभि
र्मंत्रैः प्राड्विवाकः॥ त्वमग्ने वेदाश्चत्वारस्त्वं च यज्ञेषु हूयसे॥ त्वं मुखं सर्वदेवानां त्वं मुखं ब्रह्मवादिनां॥ जठ
रस्थोऽसि भूतानां ततो वेत्सि शुभाशुभं। पापं पुनासि वै यस्मात्तस्मात्पावक उच्यते। पापेषु दर्शयात्मानं
अर्चिष्मान् भव पावक अथवा शुद्धभावेषु शुद्धो भव हुताशन॥ त्वमग्ने सर्वभूतानामंतश्चरसि
साक्षिवत्॥ त्वमेव देव जानीषे न विदुर्यानि मानवाः॥ व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति॥

© Dharmartha Trust J&K. Digitized by eGangotri

व्य·म·
३५ तदेनं संशयादस्मान्मतस्त्रातु महसीति [illegible] पं स्तु॥ ततो हि पिंडमुदके निक्षिप्य पुनः संताप्योदके निक्षि
प्य पुनः संतापनं तृतीयस्तापः। एवमभिमंत्रितं स्नात ममग्निवर्णमयःपिंडं संदंशेन गृहीत्वा प्राड्विवाक उपोषि
तस्य स्नातस्यार्द्रवाससः शिरोबद्धपत्रिकापत्रस्य पश्चिमे मंडले तिष्ठतो दिव्यकर्तुः पुरतस्थानीय त्वम
ग्ने सर्वभूतानामंतश्चरसि पावक॥ साक्षिवत्पुण्यपापेभ्यो ब्रूहि सत्यं कवे मम॥ इति दिव्यकर्त्राभिमंत्रि
तं तस्य कृतसंस्कारयोर्हस्तयोर्निक्षिपेत्॥ कृतसंस्कारयोर्व्रीहीन्मर्दयित्वा जलौ कृतयोस्तिलकालव्रण
किणादिस्थाने घलक्षक [illegible] दीनां कयित्वास समसमान्यश्वत्थस्य पत्राणि अलाभे र्कपत्राणि समशा
मीपत्राणि सरूर्वापत्राणि अन्यतान्दध्यक्षतान्सप्ताणि च विन्यस्य सप्तभिः शुक्लसूत्रैः समहस्त राम
तावेष्टितयोः॥ ततो दिव्यकर्त्ता द्वितीयादीन्यष्टमांतानि मंडले षो [illegible] शुद्धो भवति॥ इत्यग्निदिव्यविधिः॥ ३५

वपदं निक्षिपन् ~~[illegible]~~ शतपदानि शनैर्गत्वा अग्निस्यमयः पिंडं नवमे निक्षिपेत ततः पुनः कराभ्यां व्रीहीन्संम
र्द्य ह्यहस्तश्चेत।
द

© Dharmartha Trust J&K. Digitized by eGangotri

अथ जलविधिः ॥ पितामहः ॥ नोपस्थातः प्रवक्ष्यामि विधिं धर्मं सनातनं ॥ मंडलं धूपदीपाभ्यां कारयेत्तु विच
क्षणः ॥ शरान्संपूजयेत्सम्यग्वैणवं च धनुस्तथा ॥ मंगलैः पुष्पधूपैश्च ततः कर्म समाचरेत ॥ धूपदीपाभ्यां
शरान्संपूजयेद्दिग्पन्वपः ॥ पूजां च मंडले कार्या ॥ धनुः परिमाणं घाहु नारदः ॥ क्रूरं धनुः सप्तशतं मध्य
मं षट्शतं स्मृतं ॥ मंदं पंचशतं ज्ञेयमेष वै योधनु विधिः ॥ मध्यमेन तु चापेन प्रक्षिपेद्वश
स्त्रयं ॥ हस्तानां तु शते सार्द्धे लक्ष्यं कलाविचक्षणः ॥ सप्तशतं सप्ताधिकशतानां गुलं ॥ एवं षट्शतं
पंचशतं च ॥ कात्यायनः ॥ शरांश्चानापसायां प्रक्षिप्य कुर्वीत विज्ञरूपे ॥ वेणुकांडमयाश्चैव नेत्तुम्भा
ड स्वर्द्धैव लिपयेत ॥ नारदः ॥ गत्वा तु जलस्थानं तटे ॥ तोरणमंडिते ॥ कुर्वीत कर्णमात्रं तु भूमि
भागे समे शुचौ ॥ गंधमाल्यैः सुरभिभिर्गुग्गुलीरसहितादिभिः ॥ सतोरणं ॥ पक्कुर्वीत पूजामादौ समाहि

© Dharmartha Trust J&K. Digitized by eGangotri

प्र·म·
३६

मः। ब्राह्मणः सत्रियो वैश्यो रागद्वेषविवर्जितः॥ नाभि[illegible]त्रे जले स्नाप्यः पुरुषः स्याप्रकवघली॥ पितामह

हः॥ स्थापयेत्स्वयमंतोये स्तंभवत्पुरुषं नृपः॥ आगतं प्राङ्मुखं कृत्वा तोयमध्ये तु कारिणं॥ ततस्तावा

हयेद्देवान्सलिलं चानुमंत्रयेत॥ देवानधर्मोदान। धर्मावाहनादि शिरः पत्रारोपणांतं कुर्यात्तदुमादि

न्यनुमंत्रणामंत्राश्च योगेश्वरव्याः। व्यासः॥ सत्येन मा भिरक्षस्त्वं वरुणेत्यभिशाप्यकं॥ नाभिदघ्नोदक

36

स्यस्यगृह्णीतोरू जले विशेत॥ कम्ठुरकमभिशाप्याभिमंत्र्यापयेः॥ बृहस्पतिः॥ अवरुणप्रवेशपुरुष

प्रक्षिप्तेत्साय कत्रयं। पितामहः॥ स्नेहमात्तु चत्रियः कार्यस्तद्वत्रिर्ब्राह्मणोपि वा। अक्रूरहृदयः शांतः

सोपवासस्तथा शुचिः॥ कात्यायनः॥ द्विहेतु मज्जनं कार्यं गमनं समकालिकं॥ मज्जनसमकालिक राम

मिष्यते॥ नारदपितामहौ॥ शरप्रक्षेपणस्थानाद्धवाञ्जवसमन्वितः॥ गच्छेत्परमयाशक्त्या यत्रा २६

© Dharmartha Trust J&K. Digitized by eGangotri

सो मध्यमः शरः ॥ मध्यमं शरमादाय पुरुषोऽन्यस्तथाविधः ॥ प्रस्थाग च्छेद्द्रुवेगेन यतः स पुरुषो गतः ॥ आगतस्तु
शरग्राही न पश्येत्तितथाजले ॥ अन्तर्जलगतं सम्यक्तदा शुद्धं विनिर्दिशेत् ॥ अन्यथा न विशुद्धः स्यादेकांग
स्यापि दर्शनात् ॥ स्थानाद्वान्यत्र गमनाद्यस्मिन्पूर्वं निवेशितः ॥ एकांगस्येति कर्णपरं ॥ तथा च कात्यायनः ॥ शिरो
मात्रं तु दृश्येत न कर्णौ नापि नासिका ॥ अप्सु प्रवेशने यस्य शुद्धं तमपि निर्दिशेत् ॥ पितामहः ॥ शरस्य पतनं
ग्राह्यं सर्पणं परिवर्जयेत् ॥ नारदः ॥ पंचाशतो धावकानां यौ स्यातां मधिकौ जवे ॥ तौ च तत्र नियोक्तव्यौ
शरानयनकारणात् ॥ अथ प्रयोगः ॥ जलस्थानं नदीसागरकूपदेवखातस[?]स्तडागादि स्थिरतोयं
योज्यं ॥ अल्पसमाहार्यतृणशैवालोर्मिपंकग्राहजलूकमत्स्यादिदुष्टं शीघ्रवेगमित्यादि वर्ज्यं ॥ तत्र नाभिद
घ्नजले पश्चात्पूर्वाभिमुखोऽस्याधः स्थूणा कार्या ॥ तत्सन्निधौ पश्चिमतीरदेशे शोध्यकर्णे क्षितं तोरणं कार्यं

© Dharmartha Trust J&K. Digitized by eGangotri

प्र०प्र० तत्समीपे चतुरस्रं गंडलं वैणवं धनुरानीय साग्नौ वैणवालसूयः शराश्च स्थाप्याः। तोरणात्सार्द्धशत हस्तमिते
३७ स्थंडिले तु लक्ष्यं स्थाप्यं।। ततः सशरं धनुः श्वेतगंधमाल्यादिभिः संपूज्य जलाशये वरुणमावाह्य पूजयित्वा त
तीरे स्वर्भावारुणादिरुवनां तं पूर्वोक्तं निर्वर्त्य शोध्य शिरसि क्षिप तिलापत्र मस्वध्यप्रा श्विवाकोजलमभिमंत्रयेदे
वं।। तोयसंप्राणिनां प्राणाः सृष्टेरा घातु निर्मितं।। शुद्धेश्च कारणं प्रोक्तं द्रव्याणां देहिनां तथा।। त्वात्सत्वं दर्शया
त्मानं ऋतुमाऋतुमपरीक्षण इति।। ततः शोध्यो पि सत्येन माभिरन्तं वरुणेनाभिमंत्रयेत।। ततो वत्सवधमेस्य
णस्य प्राङ्मुखस्य नाभिदघ्नोदकावस्थितस्य बलीयसः पुरुषस्य समीपं गच्छेच्छोध्यः।। ततो धनुःस्थाना
न्तस्थितपुरुषस्तद्धृति ब्राह्मणो वा नापसायान्हीन शरानलन्यप्राप्तिस्थदं दृढं निक्षिपेत।। तत एकस्मिन्शरे विनिपु राम
रुषे मध्यमं [illegible] शरं गृहीत्वा तस्य प्रसर्पणस्थानं विज्ञाय पतनस्थाने स्थिते न्येन जविना शरमोन्तस्थाने तोर ३७

37

© Dharmartha Trust J&K. Digitized by eGangotri

णामूले स्थातव्यं । जवीच पंचाशतो धावकानां मध्येन बाधिकः । ततस्तोरणामूलस्थितेन प्राड्विवाकेन कर
तालिकात्रये दत्ते तृतीयकरतालिकासमकालमेव शोध्यतोरणामूलस्थजविष्यां मज्जनं कुर्यात् तरगमने कार्यं
। मज्जनं वा वह्न्वधःसस्पृणास्पोतृगृहीतां कार्यं । ततस्तस्मिन्मध्यमशरपातस्थानं गते तत्र स्थितः श
रगृहीद्रुततरं तोरणांगतारजलांतर्गतं शोध्यं पदापश्यति दासोऽशुद्धः ॥ शिरोमात्रदर्शने पि अशुद्धो नक
णोधंगांतरदर्शने निमज्जनस्थानादन्यत्र गतेवा ॥ इत्युदकविधिः ॥ अथ विषदिव्यविधिः ॥ तत्र नारदः ॥ द
घाद्वितं सोपवासो देवब्राह्मणसंनिधौ । धूपोपहारमंत्रैश्च पूजयित्वा महेश्वरं । हिमानां स निधावेव दक्षि
णाभिमुखं स्थितं । उदङ्मुखः प्राङ्मुखो वा दद्याद्विप्रः समाहितः । ततपरिमाणमाहसएव । वर्षे च रुयवा
मात्रा ग्रीष्मे पंच यवास्मृता ॥ हेमंते सास सप्त वा शरद्यल्पा नतोविधिः ॥ अल्पा त्रियवा ॥ हेमंतः शिशिरस्तथा

© Dharmartha Trust J&K. Digitized by eGangotri

वी

ध॰म॰ प्रभुत्तलत्सक ... गो॰ प्रमाससङ्क्रते॥ वसंतत्तस्सर्वं दिव्यसारोपम प्राप्त एव॥ तत्रा विसस्तपवा मात्रे निविला नेष्वरः॥
३८ विषंवनिशं ... तैपीतस्ते देहो विष दे पंडदेहिनं॥ यत्ते नयो जितं सम्यक्पिबंति
शक्षुणान्विता ... वेषामिमंत्रणमाह याज्ञवल्क्यः विषस्य ब्रह्मणः पुत्रः सम्यक्सर्वे व्य
वस्थिताः॥ त्रायस्वास्मा ... रमेन भव मे ऽमृतं॥ नारदः॥ छायानिवेशितोरन्ध्यादिनशेषममो
जनः॥ विषवेगक्रमातीतः कुर्यात्सौमन्त्ररब्रवीत॥ विषपरिमाणबाकुलेतवधंतरमाहसएव॥
पंचतालशतं कालं निर्विकारो भवेयदा॥ तदा भवति संक्रुद्धस्ततः कुर्याच्चिकित्सितमिति॥ विषवेगाश्च
विषतंत्रे॥ वेगौरोमांचमाद्यो स्वचपति विषजःस्वेदवक्त्रोपशोषौ तस्योर्ध्वं सत्परौ द्वौ वपुषि जनयतो वर्ण रा॰म
भेदप्रवेपौ॥ यो वेगः पंचमोसौ नयनविवशतां कंठभंगं च हिक्कां षष्ठो निःश्वासमोहौ वितरति च मृ ३८

© Dharmartha Trust J&K. Digitized by eGangotri

तिं सप्तमोभक्तस्य। अत्र सोपवासेन प्राड्विवाकेन महादेवाग्रे विधिं संस्थापितं भक्षयेदिति॥ अथ कोश

विधिः॥ पितामहः॥ भक्तो पीयेय स्य देवस्य पाययेत्तस्य तज्जलं॥ समभावेतु देवानां आदित्यस्य तु पाययेत्तडुगायाः

यायये थ्वोरान पेवशास्त्रोपजीविनः॥ भास्करस्य तु पत्तो पंवास्त्राणां तत्न पाययेत्॥ बृहस्पतिः। पञ्चकः सोभि

पुत्रः स्यात्त देवाग्रुध मंडलं॥ पन्धाल्यपाययेत्तस्माज्जलात्तु प्रस्ततित्रयं॥ नारदः॥ तमाहूयाभिशस्तं तु मंड

लाभ्यंतरे स्थितं॥ आदित्य[illegible]स्वं कृत्वा पाययेत्प्रस्तित्रयं॥ पूर्वोक्तेन विधानेन स्नानमार्द्रांबरं शु

चिं॥ नारदः॥ अर्क[illegible] तस्मात्तस्य विभाग [illegible]नाल्पसलिले नतु॥ पुनश्च श्रावपितास्तु पाययेत्प्रसृतित्रयं। अत्र

सोपवासः प्रा[illegible]भ्यर्च्य तत्स्थानादकं ग. हीत्वा धर्मावाहनादिशिरः पत्रमोपणांतं कृत्वा

जलादिबोनै[illegible]न मन्त्रयत॥ शोध्यो पितुडुनै नैवाभिमंत्र्य भक्षयेदिति॥ बृहस्पतिः॥ सप्ताहाद्वादिसप्ताहा

न

© Dharmartha Trust J&K. Digitized by eGangotri

व्य॰म॰ घरस्यार्शिर्न प्रदृश्यते ॥ उत्तरदारधनानां च सङ्कटः स्यान्न संशयः ॥ अथ तंडुलविधिः ॥ तत्र पितामहः ॥ तंडुलानां प्रवक्ष्या
३९ मि विधिं लक्षणबोधितं ॥ चौर्ये तु कृते तंडुला देयाना मत्रेति विनिश्चयः ॥ तंडुलान्कारयेच्छुक्लान् शालेर्नान्यस्य कस्य
चित् ॥ मृन्मये भाजने कृत्वा आदित्यस्याग्रतः शुचिः ॥ स्नानोदकेन संमिश्रान्रात्रौ तत्रैव वासयेत् ॥ आवाहनादि
39 पूर्वं तु कृत्वा रात्रौ विधानतः ॥ कात्यायनोपि ॥ देवतास्नानपानीयदिग्धतंडुलभक्षणे ॥ शुद्धनिष्ठीवनाच्छुद्धो
नियम्यो शुचिरन्यथा ॥ पितामहः ॥ शोणितं दृश्यते यस्य हनुस्तालु च शीर्यति ॥ गात्रं च कंपते यस्य तमशुद्धं
विनिर्दिशेत् ॥ अथ तप्तमाषविधिः ॥ पितामहः ॥ तप्तमाषस्य वक्ष्यामि विधिमुद्धारणे शुभं ॥ कारयेदायसं पात्रं
ताम्रं वा षोडशांगुलं । चतुरंगुलखातं तु मृन्मयं वापि मंडलं ॥ पूरयेद्घृततैलाभ्यां विंशत्या च पलैस्तु तत् ॥ राम
सुवर्णमाषकं तस्मिन्सुतप्ते निक्षिपेत्ततः ॥ अंगुष्ठांगुलियोगेन तप्तमाषकमुद्धरेत् ॥ करागं यो न ३९

© Dharmartha Trust J&K. Digitized by eGangotri

ष्ठुल्या द्विस्फोटो वा न जायते ॥ शुद्धो भवति धर्मेण निर्विकारकरांगुलिः ॥ प्रकारांतरमाह स एव ॥ सौवर्णे
राजते ताम्रे वायसे मृन्मये पिवा ॥ गव्यं घृतमुपादाय तदग्नौ तापयेच्छुचिः ॥ सौवर्णीं राजतीं ताम्रीं वायसीं वा
सुशोभितां ॥ सलिलेन सकृद्धौतां प्रक्षिपेत्तत्र मुद्रिकां ॥ भ्रमद्वीचितरंगाढ्ये ह्यनखस्पर्शगोचरे ॥ परीक्षेता
र्द्रपर्णेन चुरुकारं सुघोषकं ॥ ततश्चानेन मंत्रेण सकृत्तदभिमंत्रयेत् ॥ परं पवि[illegible]मृतं घृत त्वं यज्ञकर्मणि ॥
दह पावक पापं त्वं हिमशीतं शुचौ भव ॥ उपोषितं ततः स्नातमार्द्रवाससमागतं ॥ [illegible]येन्मुद्रिकां तां तु घृतमध्य
गतां तथा ॥ प्रदेशिनी च तस्या पपरीक्षे च परीक्षकाः ॥ यस्य विस्फोटका न स्युः शुद्धोऽसावन्यथाऽशुचिः ॥ अथ फा
लविधिः ॥ बृहस्पतिः ॥ आयसं द्वादशपलं घटितं फालमुच्यते ॥ अष्टांगुलं भवेद्दीर्घं चतुरंगुलविस्तृतं ॥ अग्नि
वर्णं तु तच्चौरो जिह्वया लेलिहेत्सकृत् ॥ न दग्धश्चेच्छुद्धिमियादन्यथा तु स हीयते ॥ अथ धर्मज विधिः ॥ पिताम

© Dharmartha Trust J&K. Digitized by eGangotri

गोपलिप्यपिंड ... स्तुनिधी ३

व्य·म· रुः॥ अथातु नासंप्रवक्ष्यामि धर्माधर्मपरीक्षणं॥ हंतृणां पापचमानानां पापक्षिप्तार्पितानां नृणां॥ राजा तं कारयेद्धर्ममधर्मं
४० सीसकताम्रसं॥ लिखेद्भूर्जे पटे वापि धर्माधर्मौ सितासितौ॥ अभ्युक्ष्य पंचगव्येन गंधमाल्यैः समर्चयेत्॥ सितपुष्पस्तु
धर्मः स्यादधर्मोऽसितपुष्पकः॥ एवं विधाप्ययेत्॥ गोमयेन मृदा वापि पिंडौ कार्यौ समं ततः॥ मृद्भांडकेन्तुपहते स्था
प्यौ चानुपलक्षितौ॥ उपलिप्तशुचौ देशे देवब्राह्मणसन्निधौ॥ आवाहयेत्ततो देवान् लोकपालांश्च पूर्ववत्॥
धर्मावाहनपूर्वं तु धृति त्वापत्रकं लिखेत्॥ यदि पापविमुक्तोऽहं धर्मस्त्वायातु मे करे॥ अभियुक्तस्ततश्चैकं
प्रगृह्णीताविलंबितं॥ धर्मे गृहीते शुद्धः स्यादधर्मे तु स हीयते॥ एवं समासतः प्रोक्तं धर्माधर्मपरीक्षणं॥
बृहस्पतिः॥ पत्रद्वये लेखनीयौ धर्माधर्मौ सितासितौ॥ जीवदानादिकैर्मंत्रैर्गायत्र्याद्यैश्च सामभिः॥ आ राम
मंत्र्य पूजयेद्गंधैः कुसुमैश्च सितासितैः॥ अभ्युक्ष्य पंचगव्येन मृत्पिंडांतरितौ ततः॥ समौ कृत्वा कुंभे ४०

40

© Dharmartha Trust J&K. Digitized by eGangotri

स्थाप्यौ चान्नपलान्वितौ ॥ ततः कुंभात्पिंडमर्कं ग्टहीत विलंवितः ॥ धर्मे ग्टहीतिष्णु दुःस्यात्सं पूज्यश्च परीक्षकैः ॥
श्वपप्रयोगः ॥ पत्र हृपेष्कु लंधर्मं कृत्वा मध्यमं पुत्तलकरूपं विधाय आंह्रींक्रौं हंयंरंलंवंशंषंसंहोंसोंधर्मस्य प्राणा
इह प्राणाः पुनरपीमं मंत्रं पठित्वा धर्मस्पर्श । वद्ढ हस्तेषु पुनरपितमेव पठित्वा धर्मस्य सर्वेंद्रियाणि वाङ्मनो
नेत्रश्रोत्रघ्राणप्राणा इहागत्य स्वस्त्यं सुखं चिरं तिष्ठंतु स्वाहा । हृदयेन न जीवदानं धर्मे प्रतिमायाः कृत्वा गायत्र्या
दिसामज्ञानेनेनैव नोच्चैस्तत्र्या हृतिप्रणवगायत्री पठित्वा आवाहनादि कृत्वा पचाक्रमं कुलं कृत्वा पुष्पाभ्यां
धर्मो धर्मौ सं पूज्य प्रणवेन पंचगव्यमादाय मृत्स्पष्कु कृत्वा पुष्पपुत्तंधर्मं कृत्वा पुष्पपुत्तं श्वधर्मं मटसिंपिंउद
पेकुत्वा नवे कुंभे स्थाप्य ... यपेत्र प्राड्विवाकः ॥ ततो धर्मो वाहनादि स्ववनांतं कर्म कृत्वा समंत्रकं प्रतिज्ञापत्रं संशोध्य
शिरसि बध्नीयात ॥ शोध्यस्य यदि पापं विद्यते हं धर्मं स्वतः पादमेकं रमित्स्फुद्धा पंकुभात्तयोरे कंग्टह्णीयात ॥ धर्मे

© Dharmartha Trust J&K. Digitized by eGangotri

ग्र.म. गृहीतेषु द्रव्यं तितो दस्निरणांदद्यात॥ अथशपथाः॥ मनुः॥ सत्येनशापयेद्विप्रंक्षत्रियंवाहनायुधैः॥ गोबीजकां
४१ चनैर्वैश्यंशूद्रंसर्वैस्तुपातकैः॥ बृहस्पतिः॥ सत्यंवाहनशस्त्राणिगोबीजकनकानिच॥ देवब्राह्मणपादांश्च
पुत्रदारशिरांसिच॥ एतेचशपथाःप्रोक्ताःस्वल्पेर्थेसुकराःसदा॥ साहसेष्वभिशापेषुदिव्यान्याहुर्विशोधनं॥
याज्ञवल्क्यः॥ प्रवीकचतुर्दशाद्वीयस्यनोराजदैविकं॥ व्यसनंजायतेघोरंसशुद्धःस्यान्नसंशयः॥ घो
41 रंमहत्॥ स्वल्पस्यदक्षिणामपरिहार्यत्वादितिमिताक्षरायां॥ कात्यायनोपि॥ प्राक्चतुर्दशकाद्वस्योयस्यनोरा
जदैविकं। व्यसनंजायतेघोरंसज्ञेयःशपथैःशुचिः॥ व्यसनमापत्॥ घोरमतिपीडाकरं॥ स्वल्पस्यशरीरधर्म
त्वादितिवाचस्पतिमिश्रस्मार्तभट्टाचार्यौ॥ पुनःकात्यायनः॥ अथदैवविसंवादेत्रिसप्ताहाद्दापयेत्॥ अभि राम
युक्तंप्रयत्नेनतमर्थंदण्डमेवच॥ तस्यैकस्यनसर्वस्यजनस्ययदितद्भवेत्॥ रोगोग्निर्ज्ञातिमरणंऋणं ४१

© Dharmartha Trust J&K. Digitized by eGangotri

दाप्योदमंच सप्त ज्वरातीसारविस्फोटगृहस्थिपरिपीडनं। नेत्ररुग्गलरोगस्फुटयोन्मादः प्रजापते। शिरोरुग
भुजभंगश्च दैविकाद्याधयोनराः॥ दैवविसंवादेन्नातिमरणाद्दौतस्यैकस्येति॥ तेन देशव्याप्य एकमार्गादिव्याहृतिः॥
अत्र तस्यैव नेनयस्वीकाभियुक्तोपरामर्शादभियुक्तस्यज्वररोगादिर्भंगलिंगं॥ नतूजनस्फुटत्वादेः॥ सोपिच महानल्पस्वल्पर
तिप्रागेवोक्तं॥ एतदभिप्रायेणैवाभियुक्तस्यासाधारणरोगादिर्भंगलिंगमित्यर्थ इति वाचस्पतिमिश्राः। अत्र
एवज्ञातिमरणमित्येवोक्तं न तज्ज्ञातिरोगादिरिति॥१८॥ अथ पदायादिनिर्णयोपयोगिस्वत्वं॥ तच्च क्रयप्रति
ग्रहादिजन्यः शक्तिविशेषः। तत्कारणमातृकपादीनां लोकव्यवहारादेवगम्यते॥ न शास्त्रात॥ तदनभि
ज्ञानामपि तद्दर्शनात॥ शास्त्रकल्पनायां गौरवाच्च॥ न यविवेकेभवनायोप्येवं॥ यतु गौतमः॥ स्वामी रिक्थ
क्रयसंविभागपरिग्रहाधिगमेषु ब्राह्मणस्याधिकंलब्धं विजितं क्षत्रियस्य। निर्विष्टं वैश्यशूद्रयोरिति॥

© Dharmartha Trust J&K. Digitized by eGangotri

व्य·म· तद्धनेऽप्रसिद्धकारणानुवादकं॥ स्वामिस्वत्वध्वंसमात्रेणापत्यस्य भवतीति तस्मिन् रिक्थमिति प्रयुंजते लोकाः॥
८२ क्रयप्रतिग्रहादिवारयितुं मात्रपदं॥ अत्र तादृशध्वंस एव रिक्थपदशक्यतांऽक्रयादिस्वत्वोपायसमभिव्याहारात्॥
नागृहीतविशेषणान्यायाच्च॥ पितरि जीवति तद्द्रव्ये पुत्रादीनां पूर्वमनुत्पन्नमेव स्वत्वं स विभागेन जन्यते॥
इति धारेश्वराचार्याः॥ स्मृतिसंग्रहकारश्चात्र॥ उत्पत्त्यैवार्थस्वामित्वं लभंत इत्येवमादिवचनेन पुत्रोत्प
त्तेरेव पितृधने पुत्रनिरूपितस्वत्वोत्पादकत्वबोधनात्॥ अपि पितामहोपात्ता निबंधो द्रव्यमेव वा॥ त
त्रस्यात्सदृशं स्वाम्यं पितुः पुत्रस्य चोभयोरिति वचनाच्च॥ न चेदं पितामरणस्यैव स्वत्वोत्पत्तिहेतुत्वं गमय
ति न पुत्रोत्पत्तेः। मरणकालेऽनुत्पन्नपौत्रे तदभावप्रसंगात्। वस्कतास्क॥ पितामहपदमविवक्षितं अन्यथा प्रपिता राम
महाद्युपात्ते सदृशस्वाम्याभावप्रसक्तेः। अन्यथा च विशेषणवाच्यः पञ्चदेवलः॥ पितर्युपरते पुत्रा विभजे ८२

मह

© Dharmartha Trust J&K. Digitized by eGangotri

पुर्दत्तं पितुः ॥ अस्वाम्यं हि भवेदेषां निर्दोषे पितरि स्थित इति तत्र पूर्वार्द्धं तावद्विभागकालविषायकं वि
धिप्रत्ययश्रवणात ॥ उत्तरार्द्धं तु तस्यैव स्वत्वस्य पारतंत्र्याख्यानतं अपरं । न तु स्वत्वाभावपरं । एतेन न जीवति पित
रि पुत्राः रिक्थं समेरन् न पर्यापि स्यात्पश्चादधिगतं तैरनर्हा एव पुत्रा अर्थधर्मपरे स्वातंत्र्यादिति शंखवचो
पि व्याख्यातं पूर्वं निषेधार्थवादार्थानं तरा स्वातंत्र्योक्तिरिति पर्यापितैः पश्चादधिगतमित्यन्वयः ॥ तैः पुत्रैः ।
पश्चादुत्पन्नैः । अधिगतं प्रतिग्रहादिना प्राप्तं । पुत्रादिभिः प्रतिगृहीते स्वत्वाविवादात्तत्रापि स्वातंत्र्यं किमु
त पित्र्यर्जित इति तात्पर्यार्थः । इदं चास्वातंत्र्यं विभागकाम्यधर्मव्यवसायादिविषयं । अत एव हारीतः ॥ जी
वति पितरि पुत्राणामर्थादानविसर्गविभागाक्षेपेष्वस्वातंत्र्यमिति । आदानविसर्गपदेन व्यवसायोक्तस्सन्ते ॥
आक्षेपो दासस्यादिभर्त्सनमिति मदनः ॥ यत्तु मणिमुक्ताप्रवालानां सर्वस्यैव पिता प्रभुः ॥ स्थावरस्य तु स

© Dharmartha Trust J&K. Digitized by eGangotri

सु·म· तस्य पितृत्वात् पिता न पितामहस्य तत्र कुंडलांगुलीयकधारणादावेव पितृस्वत्वात् समात्रार्थं न तु दानादौ न वा पुत्रोत्पत्तेः स्वत्वका
४२ रणत्वनिवृत्त्यर्थः। भोगानाश्रयमपण्युपादानादष्वेवष एव स्वत्वर्थः प्रतीयते। अत एव स्थावरं द्विपदं चैव यद्यपि
43 स्वयमर्जितं। असंभूय सुतान् सर्वान् न दानं न च विक्रय इति दानविक्रयादीनामेव निषेधो न भोगस्य। अतः
पूर्वमनेकभ्रात्रादीनामपरिच्छिन्नस्वत्वं संविभागेन व्यवस्थाप्यते॥ तत्र समुदितद्रव्यगतपूर्वस्वत्वनाशेन
तदेकदेशे विलक्षणं तदुत्पद्यत इति केचित्॥ पुरुषं तु पूर्वनाशस्वत्वांतरोत्पत्तिकल्पने गौरवात्सू
र्वमेकदेशस्थितमेवोत्पन्नं विभागेन पदार्थविशेषनिष्ठतयाप्यवस्थाप्यते। प्रकृतमुच्यते। ब्राह्मणस्याधि
कं लब्धमिति। प्रतिग्रहलब्धं विप्रस्याधिकं फलजनकमिति केचित्। रिक्थस्याद्यपेक्षया विप्रस्यैवायमधि राम
कउपाय एवं क्षत्रियादेर्जयादिरिति। उक्तं जये पि जितस्य यत्र गृह्णते च द्रव्यादौ स्वत्वमासीत्तत्र नैव जेतुर ४२

© Dharmartha Trust J&K. Digitized by eGangotri

प्रकृत्य घटते जितस्य करग्राहितायां तु जेतुरपि सैव न स्वत्वं। अत एव सार्वभौमेन संपूर्णापि पृथ्वीमाण्डलिकेन च
मण्डलं न देयमित्युक्तं षष्ठे॥ संपूर्णापि पृथ्वीमण्डलस्य तत्र ग्रामक्षेत्रादौ स्वत्वं तु तत्तद्भौमिकादीनामेव॥
राज्ञां तु करग्रहमात्रं॥ अत एव इदानींतनपारिभाषिकक्षेत्रदानादौ न भूदानसिद्धिः॥ किंतु वृत्तिकल्पनमा
त्रमेव। भौमिकस्य तु क्षेत्रे तु गृहक्षेत्रादौ स्वत्वमप्यस्त्येव। तेन तत्र भूदानस्यापि फलं भवति॥ निर्विष्टं कुसी
दकृषिवाणिज्यपशुपालनलब्धं॥ सेवालब्धं च। निर्वेशो भृतिभोगयोरित्यभिधानात्॥ भृतिः। सेवा भोगः कु
सीदादिः। तत्राद्यं वैश्यस्य। द्वितीयं शूद्रस्य। अतो लोकसिद्धैव क्रयादीनां कारणता। एवं च स्वीयगवा
दिज्ञानवत्तादौ स्वत्वव्यवहारः संगच्छते॥ उपायानां शास्त्रगम्यत्वे तु न स्यात्। स्वीयगवादिज्ञाने न रूपा
द्युपायस्य शास्त्रैकबोधनात्॥ न च स्वीयगवादिज्ञाने नैव स्वभार्यायां मृतपत्न्याः कन्यापुत्रादावपि

© Dharmartha Trust J&K. Digitized by eGangotri

स्म.
४४

स्वत्वं स्यात्। इत्यपास्तं। विरुद्धं [illegible] मिसर्वं स्वं दत्त्वा [illegible] सर्वस्वदाने कन्यापुत्रादिदानापत्तौ कन्यापु
त्रादिन देयमिति धर्मसिद्धांतविरोध इति चेन्न। गवाद्यादिवं भार्यायां स्वत्वाभावेन तस्यास्तु स्वत्वे पत्ये पित्र्यभावा
त्। लोके च स्वत्वास्पदाभ्युपगंतव्यमेव स्वत्वकारणं [illegible] भार्यायामपि प्रतिग्रहेण स्वत्वं स्यादेवेति चेन्न।
न्त्रत्रियादीनां प्रतिग्रहाभावेन तस्यां भार्यायास्तु स्वत्वाभावात्तदपत्येष्वपित्र्यभावः॥ तेन सजातीयेषु एव पौत्रो
त्तनदेष्वमयापि विधिरिति सजातीयस्यैव दत्तकस्य ग्राह्यत्वात् न्त्रत्रियादीन् प्रति तावद्दत्तकप्रतिग्रहो गौ
णएवचत्वं न विप्रान्प्रति सर्वत्र संभवति। द्विजो पुत्रत्वेन पविरोधात्। न च पुत्रप्रतिग्रहविधिर्वि
प्राधिकारिक एव न क्षत्रियाद्यधिकारिक इति वाच्यं॥ दौहित्रो भागिनेयश्च शूद्रस्यापि च दापते दत्ता राम ४४
दिशौनकादिवचोभिस्तदधिकारिकत्वस्यापि स्मरणात्॥ एवं ब्राह्मणविधिना क्षत्रियादिकर्म

© Dharmartha Trust J&K. Digitized by eGangotri

यासहविप्रस्योद्वाहे दानप्रतिग्रहयोर्गौणत्वमंगीकार्यं अन्यत्र मुख्यत्वमिति वृत्तिद्वयविरोधः । सत्रि-
पान्यप्रतिग्रहापत्त्यादि विवाहप्रवृत्तिस्तु सर्वेषामविप्रतिपन्नैव । अत एव पुत्रादीनां दानं गौणमिति तत्र रत्नि-
मिश्राः । न च स्वा भार्या पुत्रः कन्या इति शब्दव्यवहारात्स्वत्वकल्पना । तस्य स्वः पिता स्वा मातेत्यादावपि वक्त्रा-
तिवाच्यकत्वेनाप्युपपत्तेः । अस्ति च नानाविधस्वशब्दस्य शक्तिः । स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रि-
यां धन इति कोशात् । पत्न्यपक्षे गर्भदासदानमुक्तं तच्चिन्त्यं । तस्मात् रिक्थमुख्यदानप्रतिग्रहक्रयविक्र-
याद्यभावेन स्वत्वाभावे तत्कुत्रचिद्गर्भदासेऽकृतसंतत्यद्योगात्तत्पत्नीत्वं प्रासंगिकं ॥ अथ दायः ॥ असं-
सृष्टं विभजनीयं धनं दायः । लाभादिसर्वसंसृष्टधनव्यावृत्तये असंसृष्टमिति वा । निरूढीकृत्य विभ-
ज्यमाने दायभागशब्दप्रयोगात् ॥ एवं च न्यासमात्रगामिभाविकसंसर्गवतोऽपि निवृत्तिः । अत एव

© Dharmartha Trust J&K. Digitized by eGangotri

व्य॰म॰ स्यतिसंग्रहे ॥ पितृद्वारागतं द्रव्यं मातृद्वारागतं च यत् ॥ कथितं दायशब्देन तद्विभागोऽधुनोच्यत इति ॥ निरूढो
४५ च ॥ विभक्तव्यं पितृद्रव्यं दायमाहुर्मनीषिण इति ॥ पितृपुत्रसंबंधिमात्रोपलक्षणं ॥ अयं च दायो द्विधा सप्रतिबंधो
ऽप्रतिबंधश्च ॥ यत्र धनस्वामिनस्तत्पुत्राद्यभावजातं न प्रतिबंधकं स सप्रतिबंधः ॥ यथा पितृव्यादिधनं ॥
यत्तु स्वामिसंबंधादेव पुत्रादेर्धनं जायते नोपाध्यंतरनिरपेक्षतया स्वत्वं भवति सोऽप्रतिबंधो यथा पितृधनं ॥ इति
45 दायस्वरूपं ॥ अथ तद्विभागः ॥ तमाह नारदः ॥ विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते ॥ दायभाग इ
ति प्रोक्तं तद्विवादपदं बुधैः ॥ पुत्रैरिति पौत्रादीनामप्युपलक्षणं ॥ पित्र्यस्येति पितामहादीनां ॥ मदन
रत्ने पित्र्यादेरित्येव पपाठ ॥ इदं च दायभागस्वरूपमुक्तं ॥ द्रव्यसामान्याभावे पितृतोऽहं विभक्त इति व्यवस्था राम
मात्रेणापि भवत्येव विभागः ॥ बुद्धिविशेषमात्रमेव हि विभागः ॥ तस्य वाभिव्यंजिकेयं व्यवस्था ॥ अथ विभाग ४५

© Dharmartha Trust J&K. Digitized by eGangotri

कालः॥ मनुः॥ ऊर्ध्वं पितुश्च मातुश्च समेत्य भ्रातरः समं। भजेरन्पैतृकं रिक्थं अनीशास्ते हि जीवतोः॥ च श
ब्दोपादाने पि मरणसमुच्चयो न विवक्षितः॥ अत एव मदनरत्ने स्मृतिसंग्रहे॥ पितृद्रव्यविभागः स्याज्जीवं
त्यामपि मातरि। न स्वतंत्रता यास्तास्वाम्यं यस्मान्मातुः पतिं विना॥ मातृद्रव्यविभागो पितर्यपि पितरि जीवति॥
मतस्य पतेर्युष्य यस्मान्नस्त्रीधनस्य पतिः पतिः॥ एतदपवदति बृहस्पतिः॥ पित्रोरभावे भ्रातॄणां विभागः संप्र
दर्शितः॥ मातुर्निवृत्ते रजसि जीवतोरपि शस्यते॥ नारदः॥ अत ऊर्ध्वं पितुः पुत्रा विभजेयुर्धनं समं॥ मा
तुर्निवृत्ते रजसि प्रत्तासु भगिनीषु च। निवृत्ते चापि रमणे पितर्युपरतस्पृहे॥ रमणः कामः। उपरतस्पृ
हो विरक्तः। प्रत्तास्वभगिनीषु चेति कान्विवदजीर मण निवत्सौ विशेषणं॥ गौतमः॥ ऊर्ध्वं पितुः पुत्रा रि
क्थं विभजेरन् निवृत्ते रजसि मातुर्जीवति पितरि चेच्छति। रक्षतीस्पने नरे जो विवृत्ति विना पि पितुरिच्छ

का

CC Dharmartha Trust J&K. Digitized by eGangotri

व्य॰म॰ ४६

46

या विभाग उक्तः॥ क्वचित्तदिच्छां विनापि विभागमाह बृहस्पतिः॥ क्रमागते गृहक्षेत्रे पिता पुत्राः समांशिनः॥ पैतृके
न विभागार्हाः सुताः पितुरनिच्छया॥ स्वार्जिते पैतामहाद्यर्जिते तदनिच्छयापि विभागार्हा इत्यर्थः॥ पैतामहे
पि क्वचित्पितुरिच्छयैव विभागमाह मनुर्विष्णुश्च। पैतृकं तु पिता द्रव्यमनवाप्तं यदाप्नुयात्॥ न तत्
पुत्रैर्भजेत्सार्धमकामः स्वयमर्जितं॥ बृहस्पतिः॥ पैतामहं हृतं पित्रा स्वशक्त्या यदुपार्जितं॥ विद्याशौर्यादिना
वाप्तं तत्र स्वाम्यं पितुः स्मृतं। प्रदानं स्वेच्छया कुर्याद्भोगं चैव ततो धनात्॥ नारदः॥ व्याधितः कुपितश्चैव वि
षयासक्तमानसः॥ अन्यथा शास्त्रकारी च न विभागे पिता प्रभुः। हारीतः॥ अकामे पितरि रिक्थभागो वृद्धे
विपरीतचेतसि दीर्घरोगिणि चेति॥ अकामे विभागेच्छारहिते इति मदनरत्ने॥ विपरीतचेतसि अधर्मवर्ति राम
नी॥ पितुरनिच्छायामपि विभागो भवतीति भावः॥ पितर्यसमर्थे ज्येष्ठपुत्रानुमत्या विभागमाह हारीतः॥ कामं ४६

© Dharmartha Trust J&K. Digitized by eGangotri

दीने प्रोषिते स्वार्त्तिं गते वा ज्येष्ठोऽर्थांश्चिन्तयेदिति ॥ शंखलिखितौ ॥ पितर्यशक्ते कुटुंबस्य व्यवहारं ज्येष्ठः कुर्यात्त
दनंतरो वा कार्यज्ञस्तदनुमतेनेति ॥ अनंतरोऽनुजः ॥ कुटुंबभरणादिसमर्थेक्षया विभागः ॥ सर्वेषां तेषां वेतनि
यम इति निष्कर्षः ॥ याज्ञवल्क्यः ॥ विभागं चेत्पिता कुर्यादिच्छया विभजेत्सुतान् ॥ ज्येष्ठं वा श्रेष्ठभागेन सर्वे वा
स्युः समांशिनः ॥ ऐच्छिकविभाग एव विहितस्तत्र रागेण इच्छायाः संभवति तत्र पक्षपातावलंबनं वैस्यात्तं न्यायो
गात् ॥ वाक्यभेदापत्तेः ॥ एकस्मै लभ्यं कस्मैचिदल्पं अदकमन्यस्मै न किमपीत्यव्यवस्थापत्तेश्च ॥ ज्येष्ठस्य विभागे
विशेषमाह मनुः ॥ ज्येष्ठस्य विंश उद्धारः सर्वद्रव्याच्च यद्वरं ॥ ततोऽर्द्धं मध्यमस्य स्यात्तदर्द्धं तु कनीयसः ॥ उद्धारे
ऽनुद्धृते त्वेषामियं स्यादंशकल्पना । एकाधिकं हरेज्ज्येष्ठः पुत्रोऽध्यर्धं ततोऽपरः ॥ अंशमंशं यवीयांस इति धर्मो
व्यवस्थितः ॥ यमलयोर्मध्ये प्रथमप्रसूतस्य ज्यैष्ठ्यं मनुराह ॥ जन्मज्येष्ठेन चाह्वानं सुब्रह्मण्यास्वपि

© Dharmartha Trust J&K. Digitized by eGangotri

व्य॰म॰ स्मृतं॥ पूर्वमयोर्ज्येष्ठ एव संतानस्तज्जन्मतो ज्येष्ठता मता॥ यस्य पूर्वं तस्य पूर्वमयोः प्रथमं ति प्रथमं मुख्यं॥ संतानः पितरज्येष्ठ एव तत्
४७ प्रि॰न्‌रे॰ष्ठं प्रतिष्ठित॰॰ति। पञ्चपिंडसिद्ध्यादि॰॰॰कगर्भेष्वनंतरप्रसूतस्य ज्येष्ठ्यमुक्तं तदनेन कार्यापेक्षाब
ध्यते॰॰॰श्रुतिमूलत्वात्। मासेन पुत्र इमद्युतोतिवत्॥ यत्तु द्वौ तत्र गर्भौ संनिवेशविपर्ययादित्यादि
47 नाभागवचने पञ्चाजातस्य ज्येष्ठ्यमुक्तं तदपनेन बाध्यते॥ पुराणेष्वस्मृति विरुद्धाचाराणां वकुशोदर्शना
त्। देशाचारतो व्यवस्थाज्ञेयेति केचित्। पुनर्भूत्पूर्वोक्तमेव कलिवर्ज्येषु पंचोद्धारविभागः कलौ निषि द्र॰
कलिवर्ज्येषु पाठात्॥ निर्णीतं चेदं समयमयूखेस्माभिः। पितुरंशाद्दपमाहनारदः॥ द्वावंशौ प्रतिपद्येत वि
भजन्नात्मनः पिता॥ इदं वैकपुत्रपरं॥ सपद्येकपुत्रः स्याद्द्वौ भागावात्मनः कुर्यादिति शंखलिखितोक्तेरितिम राम
दनरत्ने॥ एकपदं श्रेष्ठपरं। एके मुख्याम्यकेवलारत्नमरोकैः॥ पुत्रएवस्युत्तरतिपावदिति पारिजाते पितामह ४७
© Dharmartha Trust J&K. Digitized by eGangotri

ह्यार्जिते त्वेकपुत्रेणापि सहसमांशित्वमाहुर्बृहस्पतिः॥ द्रव्ये पितामहोपात्ते स्थावरे जंगमे तथा। समं अंशित्व
माख्यातं पितुः पुत्रस्य चैव हि॥ याज्ञवल्क्यः॥ भूर्या पितामहोपात्ता निबंधो द्रव्यमेव वा। तत्र स्यात्सदृशं स्वाम्यं पि
तुः पुत्रस्य चोभयोः॥ कात्यायनः॥ सकलं द्रव्यजातं यस्यागे गृहे स्थितं तस्य सैः॥ पितरो भ्रातरश्चैव विभागो धर्म्य उ
च्यते॥ याज्ञवल्क्यः॥ न्यूनाधिकविभक्तानां धर्म्यः पितृकृतः स्मृत इति॥ तत्र पितृकृतो धर्म्य इत्युक्तः स
तो न परावर्तनीय इति मदनविज्ञानेश्वरादयः॥ यदपि नारदः॥ पित्रैव तु विभक्ता ये समन्यूनाधिकैर्द्ध
नैः॥ तेषां स एव धर्मः स्यात्सर्वस्य हि पिता प्रभुरिति तद्युगांतरपरं॥ स्वस्य पुत्राणां च समांशप
क्षे [illegible] म्यान्यूनां शमाह याज्ञवल्क्यः॥ यदि कुर्यात्समानंशान् पत्न्यः कार्याः समांशिकाः॥ न दत्तं स्त्रीधनं या
सां भर्त्रा वा श्वशुरेण वेति। [illegible]दं॥ तस्य च कुल्यं ये दिति॥ अर्द्धं पूर्ववदत्तस्त्रीधनं यावता पुत्रां

© Dharmartha Trust J&K. Digitized by eGangotri

शासमं भवति तावदित्यर्थः ॥ अंशाधिकश्चैयांसस्तु, तासु ॥ अर्जनसमर्थस्य पुत्रस्य दायजिघृक्षाभावे
ऽप्याह स एव। शक्तस्यानीहमानस्य किंचिद्दत्त्वा पृथक्क्रिया ॥ किंचिद्दत्त्वं च तमुत्वा एतां दायजिघृक्षावि
हृस्यर्थमिति मिताक्षरायां ॥ पितृमरणानंतरं समविभाग उक्तः स्मृत्यंतरे ॥ विभजेरन्सुताः पित्रोरूर्ध्वं रिक्थ
मंसमृणं ॥ हारीतः ॥ समानो मृते पितरि रिक्थभाग इति ॥ याज्ञवल्क्यः ॥ पितुरूर्ध्वं विभजतां माताप्यंशं
समं हरेत् ॥ विष्णुः ॥ मातरः पुत्रभागानुसारिभागहारिण्यः ॥ स्मृत्यंतरे । जननी स्वधनापुत्रैर्वि
भागेंऽशं समं हरेत ॥ सधनात्वयावतास्वधनस्य पुत्रांशसमभागता भवति तावदेव हरेदित्यर्थः ॥ अंशाधि
कधनायास्तु नांशः ॥ सपत्नमातुः पितामह्याश्चांशमाहव्यासः ॥ असुताश्च पितुः पत्न्यः समानांशाः प्रकी
र्तिताः ॥ पितामह्यश्च ताः सर्वाः मातृतुल्याः प्रकीर्तिताः ॥ सर्वास्तपनेन पितामही सपत्न्यो विगृह्यंते । अनेकमातृ

© Dharmartha Trust J&K. Digitized by eGangotri

पुत्राणां विभागप्रकारमाह स याज्ञवल्क्यः ॥ अनेकपितृकाणां तु पितृतो भागकल्पना । एकस्यैकः पुत्रोऽपरस्य
द्वावन्यस्य त्रयस्तेषां पितृसंख्ययैव विभागो न विभाजकसंख्ययेत्यर्थः । कात्यायनः । अविभक्तेऽनुजे प्रेते तत्सुतं रि
क्थभागिनं । कुर्वीत जीवनं येन लब्धं नैव पितामहात् ॥ लभेतांशं स पित्र्यं तु पितृव्यात्तस्य वा सुतात् ॥ स एवांशस्तु
सर्वेषां भ्रातॄणां न्यायतो भवेत् ॥ लभेत तत्सुतो वापि निवृत्तिः परतो भवेत् ॥ अन्नजपदं न्यायसो प्युपलक्षणं ॥ प
रतः प्रपौत्रात् ॥ प्रपौत्र पुत्रादिः पितृपितामहप्रपितामहे छमृते छुन्नं नरं हद्ध प्रपितामहे मृते । अस्मि
श्चत्सुत्रादिकैर्जीवति तद्धनं न लभते ॥ पुत्रपौत्रप्रपौत्रसामान्याभावे सोऽपि लभत एवेत्यर्थः ॥ इ
दं च नः विभक्तपरं किं तु संसृष्टपरं ॥ अविभक्तविभक्तानां कुल्यानां वसतां सह ॥ भूयो दायविभागः
स्यादाचतुर्थादिति स्थितिरिति देवलोक्तेः ॥ आंतं लेख्यं गटहं न्तेवंयस्य पैतामहं भवेत् ॥ चरका
© Dharmartha Trust J&K. Digitized by eGangotri

व्य.म. लब्धोपितो वा भागभागागातस्तेसः॥ गोत्रसाधारणं त्यक्त्वा योऽन्यदेशं समाश्रितः॥ तद्वंशस्यागतस्यांशः प्रदा
४९ तव्यो न संशयः॥ अविभक्तविभक्तानां पितामहतस्तुत्राणां च संसृष्टानां मितत्वः॥ इदं च समदेशा
स्थितपरं॥ देशान्तरस्थास्तु पंचमादिरपि लभत एव॥ तृतीयः पंच मश्चैव सप्तमश्चापि यो भवेत्॥ जन्म
नामपरिज्ञाने लभेतांशं क्रमागतमिति देशान्तरप्रक्रमे बृहस्पतिस्मृतेः॥ क्वचिन्मातृतो विभागमा
49 ह बृहस्पतिः॥ पत्न्येकजाता बहवः समाना जातिसंख्यया॥ सापत्न्या वैविभक्तास्ते मातृभागेन धर्मतः॥ व्यासः॥
समानजातिसंख्या ये जातास्त्वेकेन ... नवः॥ विभिन्नमातृकास्तेषां मातृभागः प्रशस्यते॥ एतत्सर्वमपहारणाद्व
हस्पतिः॥ सवर्णा भिन्नसंख्या ये पुंभागस्तेषु शस्यते॥ विजातीयविभागमाह याज्ञवल्क्यः॥ चतुस्त्रिद्व्येकभागाः राम
स्युः क्रमशो ब्राह्मणात्मजाः॥ क्षत्रजास्त्रिद्व्येकभागाः विड्जास्तु द्व्येकभागिनः॥ ब्राह्मण्यां ब्राह्मणी सवि ४९
© Dharmartha Trust J&K. Digitized by eGangotri

याशूद्रासुजाताः ॥ क्षत्रजान्क्षत्रियावैश्याशूद्रजास्तु विप्रावैश्याशूद्र्योः ॥ बृहस्पतिः ॥ नप्रतिग्रहभूर्देयान्क्षत्रिया
दिसुतायवै ॥ यद्यप्येषांपितादद्यान्मृते विप्रासुतो हरेत् ॥ देवलः ॥ शूद्रायां द्विजातिभिर्जातो न भूमेर्भागमर्हति ॥
सजातावाप्नुयात्सर्वमिति धर्मो व्य स्थितः ॥ द्रव्यस्यतुलभन्तेव ॥ अपरिणीतशूद्रापुत्रस्तद्द्वांशमपिन
लभते ॥ तथाचमनुः ॥ ब्राह्मणक्षत्रियविशांशूद्रापुत्रोनरिक्थभाक् ॥ यदेवास्यपितादद्यात्तदेवास्यध
नंभवेत् ॥ पितुर्मरणोत्तरं विशेषमाहबृहस्पतिः ॥ अनपत्यस्यशुश्रूषुर्गुणवान्वाशूद्रयोनिजः ॥ लभे
तजीवनंशेषंसपिण्डाः समवाप्नुयुः ॥ गौतमः ॥ शूद्रापुत्रोप्यनपत्यस्यशुश्रूषुश्चेल्लभते वृत्तिमूलं ॥ वृ
त्तिमूलंजीवनकारणं ॥ सएव । शूद्रेपुत्रवत्प्रतिलोमास्विति । प्रतिलोमास्तुमातृकापेक्षयोत्तमसव
र्णास्त्रीषूत्पन्नाक्षिप्रधयः ॥ शूद्रेणपरिणीतायांशूद्रायांविशेषमाह ॥ याज्ञवल्क्यः ॥ जातोपिदास्यांशूद्रेण

© Dharmartha Trust J&K. Digitized by eGangotri

काममंशं हरेरन् भवेत्॥ स्त्री पितरि कुर्युस्तं भ्रातरस्त्वंशभागिनः॥ कामं पितुरिच्छया॥ अपुत्रेणेति द्विजातिभिर्देयस्याप्युप
न्नस्य पितुरिच्छया पितांशभाक्॥ नापि पितृमरणोत्तरं स्वत्वं नापि तु चाघमावेसर्वमितिमदनरमादि॥ विभागा
नंतरोत्पन्नपुत्रे विशेषमाह॥ विभक्तजः पित्र्यमेवेति॥ बृहस्पतिः॥ पुत्रैः सह विभक्तेन पित्रा यत्स्वयमर्जितं॥ विभक्त
जस्य तत्सर्वं स्वनीशाः पूर्वजाः स्मृताः॥ पषाध्ये नेन पर्णे चदानादानक्रपेषु च॥ परस्परमनीशास्ते मुक्त्वा
शौचोदकक्रियां॥ स्त्रीणामावसनेड्रप्त्वं विभक्तेभ्यो विभागग्रहणं विनाते नकार्णं नैव देयं॥ रिक्थया हकार्णं
दाप्य इति वक्ष्यमाणत्वात्॥ कस्मिंश्चित् संसृष्टे जाते न सह विभागः॥ ऊर्ध्वं विभागाज्जातस्तु पित्र्यमेव हरेद्ध
नं॥ संसृष्टास्तेन वा ये स्युर्विभजेत स तैः सहेति मनूक्तेः॥ पितृमरणोत्तरं विभागकाले स्पष्टगर्भाया मातरि त
त्सपत्न्या भ्रातृपत्न्यां वानंतरं जाते विशेषमाह॥ याज्ञवल्क्यः॥ विभक्तेषु सुतो जातः सवर्णायां विभा

© Dharmartha Trust J&K. Digitized by eGangotri

गभाक्॥ विभागश्च सर्वैर्भ्रात्रादिभिः स्वस्वांशात् किंचित् किंचिदुद्धृत्य पत्न्याः स्वांशसमो भवतीति तया कार्यः॥
विभक्तः॥ पितुः विभक्ता विभागानंतरोत्पन्नस्य विभागं दद्युः॥ इदं च तदंशेभ्यु रेकैकं सहितेभ्यस्तेयं॥
तत्स्वत्वे तु सप्रवाहा॥ दृश्याद्द्यात द्विभागः स्यादायव्ययविशोधितात्॥ दृश्याद्विद्यमानद्रव्यात्॥ भ्रातृणां विभागकाले विशेष
मातृवसिद्धः॥ अथ भ्रातृणां दायविभागो याश्चानपत्याः स्त्रियस्तासामापुत्रलाभादिति। प्रतीक्ष्या कार्येति शेषः॥ पितृम
रणोत्तरविभागे विशेषमाह बृहस्पतिः॥ असंस्कृता भ्रातरस्तु ये स्युस्तत्र यवीयसः॥ भ्रातृगृहणां भगिनीनाम
एकपत्न्याणां। तथा च स एव॥ असंस्कृतास्तु यास्तत्र पैतृकादेव ताधनात्॥ संस्कार्या भ्रातृभिर्ज्येष्ठैः कन्यका
श्च यथाविधीति॥ याज्ञवल्क्यः॥ असंस्कृतास्तु संस्कार्या भ्रातृभिः पूर्वसंस्कृतैः॥ भगिन्यश्च निजादंशाद्दत्वां
शं तु तुरीयकं॥ पैजानंष्याः कन्य [illegible] न्॥ या॥ तस्य चतुर्थं चतुर्थमंशं प्रत्येकं भागं ताभ्यो दत्वा

© Dharmartha Trust J&K. Digitized by eGangotri

...ताः संस्कर्त्तुं आह ... ग्रहणं व्यवस्थोपयोगितया ... गौणपुत्रव्यवस्थामाह याज्ञवल्क्यः॥ औरसो धर्म
५१ पत्नीजस्तत्समः पुत्रिकासुतः। क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा॥ गृहे प्रच्छन्न उत्पन्नो गूढजस्तु सुतः
स्मृतः॥ कानीनः कन्यकाजातो मातामहसुतो मतः॥ अक्षतायां क्षतायां वा जातः पौनर्भवः स्मृतः॥ दद्यान्मा
51 ता पिता वा यं स पुत्रो दत्तको भवेत्। क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयं कृतः। दत्तात्मा तु स्वयं दत्तो गर्भे
विन्नः सहोढजः। उत्सृष्टो गृह्यते यस्तु सोपविद्धो भवेत्सुतः॥ सवर्णायां धर्मपत्न्यां तु स्वत्र औरसः पुत्रो मुख्यः। पुत्रि
कासुतो द्वेधा॥ तत्राद्यमाह वसिष्ठः॥ अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम्॥ अस्यां यो जायते पुत्रः स मे पु
त्रो भविष्यतीति॥ द्वितीयमाह स एव॥ तृतीयः पुत्रिकैवेति। अस्मिन्पक्षे कन्यैव पितुरौर्ध्वदैहिकादिकार्ये॥ क्षे राम
त्रजश्च पुत्रभ्रात्रादिपत्न्यां गुर्वाज्ञया देवरादिभिः सगोत्रेणान्येन वा॥ अक्षतायां पूर्ववोढ्रा भुक्तायां॥ क्षतता ५१

© Dharmartha Trust J&K. Digitized by eGangotri

यत्तेन भुक्ता या वा चोढा तेरणोत्पन्नः पौनर्भवः अत्र केचित् कलिमिन्नागीरणाः उत्पाकल्लो भक्षीः हन्नौ एते तरेषां तु
पुत्रत्वेन परिग्रहः तत्तन्निषेधेनुपपाठात्। अथ दत्तकविधिः मनुः॥ माता पिता वा दद्यातां यमद्भिः पुत्रमाप
दि। सदृशं प्रीतिसंयुक्तं स ज्ञेयो दत्रिमः सुतः। वाशब्दान्मात्रभावे पित्रैव दद्यात् पित्रभावे मातैवोभयसत्त्वे तु भाव
यीति मस्त्रः आपद्ग्रहणं दत्ता परिग्रहेऽपि अयं निषेधो दातृ सुपुत्रस्य यो नक्रत्वपि द्वैत विज्ञानेश्वरेणात्र
त्वा अस्य वाक्यस्य हेतुत्वपक्षे अनेकत्वपै: त्वावगमात्कपर्यं निहिघापर्यंते पिता नियमाह दस्य आवश्यकत्वा
न्नाहेति क्रमे कार्यविशेषप्रयोजकाहेष सिद्धिः। केचित्तु आपद्युद्धस्य तात्पर्यंता गाधापन्ने रनाय तारिसरवा
पकत्वाभावेन न निषेधार्थकत्वं किंत्वापद्यहो निमित्तमात्रबोधकत्वमेवानवनैमित्तिकत्वे आपदि पुत्रो
हानेमस्त्रवा [illegible] वयस्पमं द्रासंहिसेतदंभम [illegible] कत्वा तेन आपदि निमित्तेऽनावश्यकत्वाभावात्

© Dharmartha Trust J&K. Digitized by eGangotri

५० परपिण्डि तारम्भकरणे तेनैवोक्तं । ऐरिणापा दिनिषधातिक्रमेहुविरोध एवमार्यात्वं तत्सघतएवेति तत्र प्रनेनैवामा
५० स्त्रीमसहशंकुलगुणाहि भिन्नेजो मान्यातः स्त्रियाहस्यपमप्राहैदेगः कोभवतीति मेधातिथि स्मृहणं जानातीति कुल्लूक
भः हृष्टुं तेनेदं याज्ञवल्क्येन श्रौरसोधर्मपत्नीजइति द्वाहृष्ट्वा पिपुत्रान नतुक्रमात्म जातीये ष्वयंमोक्तस्तन येषु मया वि
५२ धिरित्युपसंहारात्तस्याद्धा करिष्यतेनेदं वक्ष्यमाण श्लोनेक व चोभ्याविज्ञानेप्युरोप्येतं स्वेन जातमात्रेण पुत्रीभव
तिमा नेइति स्मेष्टस्यै व पुत्रकार्यकारणो मुख्यत्वात्तन हेयइत्यमपिनिषेधोदातुरेवनप्रतिग्रहीतुरिसपिसस्मा
हर्षं प्रतिषेधीशातु रेवप घेतस्मेष्टशननिषेधकः तेनसस्यान्नतुस्मात्तिमानाभावात्तु पुत्रीभवतीति प्रात्रिवोस्वे
हरणायाकरणमात्रपरत्वाच्चातएवपितृणामनृणोभवेत्तस्मात्सर्वमर्हतानुतनए इं सम्मच्छति सवर्णंदत्तस
नेकश्चपुमानेवंभवति नकन्या सज्ञेयोहृत्रिमः सुत इति संज्ञासंज्ञिसंबंधबोधके वाक्यगतेन सइति सर्वनाम्ना माता राम
पितृकर्तृकं प्रीतिजलगुणकापन्निमित्रकामोभूतसजातीयपुंस एवाष्टवर्ष ब्राह्मणानुपतपातत्तेम धायपीतीति ५२

© Dharmartha Trust J&K. Digitized by eGangotri

तच्छ्रुत्वेनाष्टवर्षब्राह्मणपुंसत्वोपनयनादिसंस्कृतस्ते वयरामपितु। एतेनक्रैमेमनिसमितिर्मतोहनिमशब्दोहान
निर्दृप्तकर्मत्वापि शेषाह्मणपानस्मैवाहस्तौकमामपमिथन इति केषांचिद्वृत्तिःपरास्ता। पुनमतिग्रहमकारमाहशी
नकोहंमवहाभिपुत्रसंग्रहमुत्तमंस्मसुत्रोम तपुत्रोवाए त्रार्पसमुपोष्ठाचवासमीकुडल्नेरत्वाउस्मा बंचागुलोपक
ल्पचार्येधर्मसंपुतकंवेदमर्ववेदपारगैर्हिःकुशानमंत्रैवपात्नाशेत्तेष्ठमेवएतानाहूसवष्मत्तुद्गातानाइपसत्रमः। वेष
नन्नेनसंमोसब्राह्मणांश्चविशेषतः। स्नान्वाधानादियर्मत्रंक्लत्वाऽपीसक्नादिकं दातुं समर्हं गत्वानुपुत्रेहेहीतिपा
चेपत दानेसमर्प्यीदातास्मैपेयज्ञे नेतिर्पवभिः हेषस्पत्नेतिर्मित्रेणाहस्ताभ्यांइति गः त्येचाभ्यंगाहं गेत्यूचे जष्वा
वाघ्रायाशिशुमूर्ध्नि। वह्मादिभिरलंकृतस्पपुत्रछायावहं सुतान मगीतेश्चवाघेश्वस्वस्तिशब्दैश्च सुपुतांगःहम
आतमासत्पत्र...वाद्विधानतः पस्त्वाहू हेतवोलेवतुभ्यमग्नरुवेकपा। सोमोदद हिसताभिः प्रतप्त्वेयंचमिस्तपा

© Dharmartha Trust J&K. Digitized by eGangotri

२

स्विष कद्रादिहोमं कृत्वा शेषं समापयेत् ब्राह्मणानां सपिंडेषु तेषां पुत्रसंग्रहात् तदभावे सपिंडे वा अन्यं अन्यत्र तु न की

व्य० र्त्तितास्तु क्षत्रियेषु तास्तु जातेषु वा गुरु गोत्रसमो पिता वै शेषानां वैश्यानां तेषु शूद्राणां शूद्रजातिषु सर्वेषां चैव वर्णा

43 नां तत्र निषेध एव नान्यतः दौहित्रो भागिनेयस्तु शूद्रस्यापि च दीयते । नैकपुत्रेण कर्त्तव्यं पुत्रदानं कदाचन । बहुनां

णां कर्त्तव्यं पुत्रदानं प्रयत्नतः इति स्मृतिर्गुरवे दत्त्वा अथ यथाशक्ति द्वितीयत्नमा । न पोषणं स्मेवा पित्रे श्रेष्ठा वित्तं शतं

53 वा शूद्रः सर्वस्वमेवापि चान्यः शतं ततः षष्ठं वा पालयेत् पावहंस इत्यर्थो दौहित्रो भागिनेयश्च इति यथाश्रुतार्थयोगित्वेन दुस्स

मेवावदंनाय हंसेत्र पक्षे तात्सत्रं संभवत्सपिभाव्यत्वेन तु यद्यादिदं प्रोषानन्वाहित्ति मेधानुवर्त्तनेन कवन्नभावयुययोगि राम

नो मेवावहू णास्वेव भाव्यत्वमुक्तं तथेहाप्यनया हत्तरान्विनवत् तुर्थ्यपर्ये यद्यां शूद्रः इत्येव दौहित्र भागिनेयावपि प्रति

शिषितयाभाव्यान्यत्र तत्परोरेव विधेयत्वेन दौहित्र भागिनेयावेव शूद्र इत्येति नियमविधि विषयता एवं उक्तार्थः इस 43

© Dharmartha Trust J&K. Digitized by eGangotri

त्वविषेयत्वेनतद्विषयत्वायोगान्नोशूद्रस्येतिमन्त्रनवर्तकोविमादिशेषांतरधरिसंख्यफिनेः तस्माद्बोहिन
भागिनेयमेवशूद्रस्यमुख्येनद्रभादित्वेमोपिसजातीयः शूद्राणांशूद्रजातिविनितेनेगोकेनचेदं
जातिपदंहीहि भागिनेयपोरेनापर्सद्विपतांरोहित्रत्वभागिनेयत्वयोः सजातियत्वसचपरस
रव्यभिचारित्वात्तएकस्मतोसामान्यवाक्यपर्यायपन्नेश्चविहितंचैतद्धेतनिर्णयेतातवरणोः शिष्यमा
णेप्येवंएवंचनिषादस्थपतिवन्मन्त्राधिकारेसिद्धेपशुद्धिविवेकउक्तं।। वैदिकेसाध्याहोमवहिरुक्तमति मंत्र८
ग्रहेशूद्रस्यानधिकारइतितद्याप्तंसमंत्रहोमस्तुतेनविप्रद्वाराएकार्यः।उपवासोव्रतंहोमस्तीर्थस्नानज
याहिकोर्यमेः स्यादितंपस्सर्वंतस्यतापूर्वन्नितिदपुराणेकिः स्यात्तद्वारेनाथावप्येवमेवपन्तुयाणा
रएवाहहिरण्यधेनुयोतिपः शूद्रस्यजुहुयात्द्विजः व्राह्मणस्तुमेषुशूद्रस्तुव्राह्मणोभवेदितिनशूद्रस्य

© Dharmartha Trust J&K. Digitized by eGangotri

R

५४ कर्मिणा पुरा पवित्रमन्वच्छेषं प्रतिपादयती तिमाधवः। स्त्रिपाप्मा विग्र इयर्ईगाधिकारः स्त्रीशूद्रा द्वसधर्माणा इतिवा व्यात्
वसिष्ठः स्मृकशोदितसंभवः पुरुषोमातापितनिमित्तकस्तस्मान्दानविक्रेय परित्यागेषु मातापितरौ प्रभवतो न त्वेकं तु
त्रंहि ग्राह्यमिति गच्छेत् याज्ञवल्क्यशयते पुरुषनस्त्रीसुत्रं हि ग्राह्यमिति गच्छेद्याज्ञवल्क्यानुज्ञानात् भर्तुः पुत्रं प्रति गच्छेद्धीषु
न त्वेकं नाहूय पराज निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा हरेपांधवसंनिकृष्टमेव प्रतिगच्छेद्यानुसंदेहे हेवो सन्निकृष्टो दूरेवां
धवंम्नू रानिवेस्त्रार्यपरिविज्ञापने स्येकेन बहूंस्तारयेदीति तस्मिन्नेव प्रतिगच्छेद्धाते चौरस उत्पन्ने तचतुर्थं भागं यातसंदेहे हेचो
56 भागभागी स्यादिति भर्त्रनुज्ञानुसधवा पाएव देशार्थत्वात् विधवायास्तु नांविनोपि यत्तद्भावे ज्ञातानामानुपाभवति
त्वतएव रहेलकमापितावन्नेयतिसुभास्तुवा ईकी। अभावे ज्ञात पत्नी घान स्यातं अंकावित्विया इतियाइव लेघा एम
जावस्था विशेष एव भर्तुः। यारतेऽमुकं तरभावे वाईका दिनात स्थापमतां वायुत्राहीनामपि कास्यपेनेनापिना ए
खल्वनूक्ता प्रियोभन्नास्तुते नवाविफलं तमके तस्माय त्क एसौ ध्वंहि हिक मिति अवस्था विशेष एव पितृ भ्रंशोय
५४

© Dharmartha Trust J&K. Digitized by eGangotri

नुज्ञातुकाः श्रौर्द्धदेहिकं पारलौकिकं अतोपसंस्थैव सद्ध्यायां भर्तुरनुज्ञामामात्रेवात्मानं घतोनत्त्वपूर्वो विधायतोत्र
तोविधवायाभर्तुरनुज्ञां विनाप्यधिकारः । अहर्बोधवंशीयस्यापुत्रं संज्ञिह्रितः सपिंडः । संन्निहितेष्वविभ्रात्रपु
त्रोमुख्यः भ्रातृणामेकजातानामेकश्चेत्पुत्रवान्भवेत् । सर्वे तेन पुत्रेण पुत्रिणोमनुरब्रवीदितिमनूक्तेरितिमि
ताक्षरायां दृष्टमेव चेन हृदयम् ःप्रयोजनं पुत्रेममासंभवातेहूरेबोधवंशजातां परत्न दृकलुपीकरणीनतुतत्पु
त्रोपिप्रभवतिनितान्तचरणाः । पुत्रं वैद्धबोधकाभावात्पत्नुकालिकापुराणोपितृमेधेरणायः पुत्रः संस्कृतं च
क्रियते । आचूडांतेन पुत्रः स पुत्रतां यातिवान्यतः । कृतोपनयसंस्कारो निजगोत्रेण वै कृताः । स्वाघास्तनया
स्ते स्युरन्यथा दासउच्यते ऊर्द्धं तु पंचमाद्वर्षान्नदत्ताद्याः सुतान् पाग्गृहीत्वापंचवर्षीयं पुत्रेष्टिं प्रथमं चरेत् इति
तद्द्वयमगोत्रपरम् । आचूडांतमित्यत्रामि व्याप्त्यर्थमपि दार्थ्यत्वेन चूडोपनयसंस्कारं कृत्वा नेन विरोधापत्तेः दृष्ट
तुवचो नततयाविहन्नम रणीयं क्षिप्रिका कालिकापुराणतुल्यं सद्दृशोनान्यं पंचहस्तकोद्विविधः । केवलोद्याम

© Dharmartha Trust J&K. Digitized by eGangotri

५५ ४

ख्यपरागस्य संविदं विनाहरणं ऽमाघः । आवमोरस्माविति संविदा हरणले स्वः । तत्राघः प्रतिग्रहीतुरेवौर्ध्वदेहिकश्राद्धादि
दा० कुर्यात् । तथाहि पुत्रप्रतिग्रहस्याभावाकांक्षायां पुत्रं प्रतिग्रहीष्यन्नित्यादि के नद्विषेयपुत्रमिति द्वितीयान्तेन तस्य त्रस्वाभाव्य
त्वमुक्तं तत्र जन्य पुंस्यामपि पुत्र त्वं मातृपितृशक्यां । तेन पुत्रशब्देन सर्वेष्वपि कार्यं लक्ष्यपित्वात् तत्र पावक मदृष्ट
भावमङ्गीकर्तव्यमेव । अत एव प्रतिग्रहात् कुलेषु च पिण्डादि संबन्धविशेषस्य प्रवृत्ति निकार्या । एवं वर्तते । अत एव मह
मनुः गोत्ररिक्थे जनयितुर्न भजेद् दत्त्रिमः सुतः । गोत्ररिक्थानुगः पिण्डो व्यपैति ददतः स्वधा । गोत्ररिक्थे जनयितुर्न भजे
द्दत्त्रिमः सुतः गोत्ररिक्थानुगः प्रापस्तत्स्वमनिषतद् इति यावद् दत्त्रिमः केवलः द्व्यामुष्यायणो गोत्राद्यनुवृत्तेर्वे सत्त
मारणत्वात् पिंडः श्राद्धं मौर्ध्वदेहिकादाति मेधातिथिकुल्लूकभट्टादयः । पिंडदातृपिंडं स्वधा ऊर्ध्वदेहिक श्राद्धं द्वास्यपरेव एम
स्तुनस्तु यथा ज्ञात एव हलक्षके शोऽग्निमादधीत तत्र यथा वस्था विशेषो यथा वार्द्धं मंत्र वैदिमिनो सर्वं वहिर्देहास
नेन दृश्यते विशेषाल्लक्ष्यते तथात्र गोत्ररिक्थपिंडस्वधापदैर्जनकादीनां संबंधस्य पुत्रकार्य मात्रं लक्षणीयत्वात् निर

© Dharmartha Trust J&K. Digitized by eGangotri

न्दु।

त्तिस्त्यतातेनमसोहरपितव्यारिक्थं धनिष्टान्निरपिसि र्दमवति। अतएवकेवलहस्तकजन्मः पुत्रोपिपिर्दसपिंडीकरणा
पार्वणश्राद्धाहिप्रतिग्रहीत्रैवसहकुर्यात एवंतत्सुतोपि पत्नु वैरलोककीतसुत्रिकापुत्राः परपाग्नहेणानार्षेपा
५२ स्तिर्यो ष्यापणाभवंति। तादिनाद्यामुष्यायणानुपक्रमकोतायनः। अथयद्यपिपांस्त्वा सुभायांसु अप संतस्या
द्विकव्यहरेपुः पिंडचैमहानिपरूपं उरपयधुमपोर्नृस्यातुभाभ्यांहयुस्केहिमिर आद्धे पपुगुहिस्पद्रोवनु
वीर्नृपूतेप्रतिग्रहीतारं वीसाटं पितारंचात नीयास्तुरुषारितितत्कर्मुरव्यायणापद्यामुष्यायणोभवतीतुपक्रमात
तिनद्यामुष्यायणाजनकस्यप्रतिग्रहीतुर्वपुत्रांतरएस्वेतस्मै यिदेहघात रिक्थं कुर्हो यानूनतत्सत्वे। यदातुमयो
रपौरसाः पुत्राः संतितरणे स्तोऽपिवनदघातप्रतिग्रहीत्रौरसांशस्यचतुर्थभागंभहरेत्। तस्मिंस्त्रेत्वप्रति हीतेऽपौ
रसतुल्यधेनवत्तु र्थभागभागाश्यादित्तिवसिष्ठोक्तेः उत्पन्नेत्वौरसेपुत्रेचतुर्थांह शेषः सुताः। सवर्णा असवर्णास्तुप्रा
साच्छादनभाजः। ..नारतैश्राप्नोतेऽम्वात तियांशहरादितिकल्पतरौयाज्ञवल्क्येण हेनजरनकोदयद्वातमि द्वाने

© Dharmartha Trust J&K. Digitized by eGangotri

१ द्विरयकुर्युः श्राद्धं यथाविधानिं ॥ तदपि कात्यायनीयसमानार्थमेव ॥ अपयवथ ॥ धामुष्यापणदत्तकादयो अन्न
क्षत्रतिग्रहि ॥ ५ ॥

५६ श्राद्धं पद्धातक्रमयोः पुत्राभावेऽस्त्र तु एकस्मिन् श्राद्धद्वयस्यापि उक्तप्रकारेण गोत्रयोरप्येकमेव श्राद्धं कुर्यात्तु पदहावेहेमाद्रीका
ब० रो निर्णीतः यावन्तः पितृवर्गाः स्वस्यावच्छिन्नकारणः प्रेतानां योजनं कुर्युः स्वकीयैः पितृभिः सह यावद्यास्तेहायन्तु
त्वाः योनास्त्वेकमेकत्वमः । चतुर्थः पुरुषः षष्ठं हस्तस्मारेषां त्रिपोरु श्राद्धकारणेषु कालेषु विशेषो नास्ति वर्गीणां
मतानामेकत्वेक मैत्रीकुलमतानां स्ववर्गस्थानिनामादिभिः सह सपिण्डीकरणं कुर्युः । दत्तकादिपुत्रास्तु तेषां जनकप्रतिग्रहीतृ
श्यां सह कुर्युः तत्सौत्रा अपि स्वपितरं दत्तकेन पितामहेन तज्जनकेन प्रपितामहेन चतुर्थेषु पुरुषेषु तत्र पौत्रे छंदः दृष्टा
न्प्रतिग्रहीतारं मुखारं पञ्चवैति जनकं तत्र चारे पदेगृ साधारणे षु भागस्यादिको नलषु जनकप्रतिग्रहीतृवर्गीणां
श्राद्धकार्यमतानेकमेवा द्विश्चं कोदिष्टं श्राद्धं कुर्यादिति किंचित्तु केवलदत्तकस्याभिधानान्न तस्य अन्वाश्वीरोर एम
सपिण्डसंविदक्ष विधानाभावात्त्रोषिना गृहीतोऽपि धुसुष्या यणएव तेनैव जनकप्रतिग्रहीत्रोः द्विरेनामावस्या
दिषु श्राद्धद्वयमेकं पश्चाद्धकार्यं तत्पुत्रेण तदर्थं कस्यप तज्जनकप्रतिग्रहीतृभ्यां ह्यामर्ष सह सपिण्डीकरणं पार्वणं

© Dharmartha Trust J&K. Digitized by eGangotri

प्राद्धाहिकांयाख्कंतनुज्ञारिभिर्यार्हुः तन्विंलपघापिकेवलदन्तकः कृपिपशन्दंतोन्नोतकस्तपापिपूर्वोक्तमनुवव
नेनजनकादीनां संबंधमात्रनिहृत्येत्रू कखातघामुख्यापरोनतर भार्यार्हृष्यो तिमिध्यते नकिंचर्ड्वेसमभातिसित
वंभुभ्योवीति नभ्रमातरं धम्भः पंचमाहिति रोतमीयिनवाजिकुलेसमपुत्र बंपावडिना होतिमिदं सध्यामुख्याप
रोक्षर्थ स्यात तस्मिन्नोपिंश्रसत्वात् अतोवश्यमेतत्सार्थक्याय के मलस्यको वाच्यतेनेमा। ख्याति नेतृकृत्वा
त। अपिधाम्रवरणाय। घामुख्यायकोप सूहत्तकर्भीतकादपः। गोत्रप्येपम्नु दाहः शोगिशोशिरपोपर्वेएते ति
नगोत्रदूयम। मुख्यापरणस्योक्त। मानमीयनवजनकगोत्रोन हृत्रिकृ केतिविरोधः केवलघामुख्यापरणाभे
हेनेवपरिहरणीयस्तन सिद्धा सेवकेवलोपिरूनकः अतएवभूरणकुंत भोजायदत्तिमलेनस्त्रापा। कुंत्याः सु
तस्यार्जुनस्यभूर पुत्रवत्सूवदुहितुः सुभद्रायाः सापिं ज्ञानिदृन्ति मैभ्रवनेनोक्तः एस गोतमीयस्यवीनसंतानजा
या। अपिनिषेधमात्रपरत्वमेव तोत्काअर्जुनेनसुभद्रापरिणयितस्याशंकयवार्तिकोर्केसर्वंधव्यवधानकुत्वना

© Dharmartha Trust J&K. Digitized by eGangotri

५२ ६ ५२

५१ स्वसमानमातामहसोमेश्वरः यत्तु कश्चित्सोमेश्वरेण गौतमवचनात्कुमारः मू[illegible]रकुले विसप्तपौ
रुषसापिंड्यमुक्तमिताहत्तद्व्यामुष्यायनविषयं न हि सापिंड्यनिवृत्तिपूर्वमुक्ता गौतमीयस्य जनककुले निषे
सं० धपरत्वमुक्तेन सापिंड्यबोधकत्वात् एवं सिद्धे केवलद्व्यामुष्यायणे ब्राह्मणेरंसा इति संविदीप [illegible] इत्यु
तिग्रन्तिग्रहीतुर्व्यामुष्यायणत्वानापत्तेः [illegible] प्रयोक्तृत्वात्त्वन्यकेवलदत्तकस्य पालकपितृकुले साप्तपौरुषं मातृ
कुले च पांचपौरुषं सापिंड्यं ॥ यत्तु हेमाद्रौ [illegible]मः स्वगोत्रेण तु यः पुत्रः कीनो दत्तः सुतोऽविधिना गोत्रमापा
57 तिन सापिंड्यं विधाय नैयत्र हेमाद्रौ मनुः दत्तकी ताहि पुत्रा रण्योबीजवपुः सपिंडता । पंचमी सप्तमीश्चैव गोत्रित्वं पालक
स्य च । यद्यपि नारदः धर्मार्थं वर्द्धिताः पुत्रास्तन्निर्णीत्रेण पुत्रवत् यं शपिंडविभागित्वं तेषु केवलं मिषत् इति तान्प राम०
दाकरणात् साकरत्वेपि द्व्यामुष्यायणस्यासमतिग्रहीतकुलेसाप्तयोरुषसापिंड्याभावप्रतिपादनार्थं । केवलदत्त
